श्री सूर्य कवचं (त्रैलोक्यमंगळं)

श्री सूर्य कवचं (त्रैलोक्यमंगळं)

श्रीसूर्य उवाच |
सांब सांब महाबाहो शृणु मे कवचं शुभं |
त्रैलोक्यमंगळं नाम कवचं परमाद्भुतं || 1 ||

यज्ज्ञात्वा मंत्रवित् सम्यक् फलं प्राप्नोति निश्चितं |
यद्भृत्वा च महादेवो गणानामधिपोऽभवत् || 2 ||

पठनाद्धारणाद्विष्णुः सर्वेषां पालकः सदा |
एवमिंद्रादयः सर्वे सर्वैश्वर्यमवाप्नुयुः || 3 ||

कवचस्य ऋषिर्ब्रह्मा छंदोऽनुष्टुबुदाहृतः |
श्रीसूर्यो देवता चात्र सर्वदेवनमस्कृतः || 4 ||

यश आरोग्यमोक्षेषु विनियोगः प्रकीर्तितः |
प्रणवो मे शिरः पातु घृणिर्मे पातु भालकं || 5 ||

सूर्योऽव्यान्नयनद्वंद्वमादित्यः कर्णयुग्मकं |
अष्टाक्षरो महामंत्रः सर्वाभीष्टफलप्रदः || 6 ||

ह्रीं बीजं मे मुखं पातु हृदयं भुवनेश्वरी |
चंद्रबिंबं विंशदाद्यं पातु मे गुह्यदेशकं || 7 ||

अक्षरोऽसौ महामंत्रः सर्वतंत्रेषु गोपितः |
शिवो वह्निसमायुक्तो वामाक्षीबिंदुभूषितः || 8 ||

एकाक्षरो महामंत्रः श्रीसूर्यस्य प्रकीर्तितः |
गुह्याद्गुह्यतरो मंत्रो वांछाचिंतामणिः स्मृतः || 9 ||

शीर्षादिपादपर्यंतं सदा पातु मनूत्तमः |
इति ते कथितं दिव्यं त्रिषु लोकेषु दुर्लभं || 10 ||

श्रीप्रदं कांतिदं नित्यं धनारोग्यविवर्धनं |
कुष्ठादिरोगशमनं महाव्याधिविनाशनं || 11 ||

त्रिसंध्यं यः पठेन्नित्यमरोगी बलवान्भवेत् |
बहुना किमिहोक्तेन यद्यन्मनसि वर्तते || 12 ||

तत्तत्सर्वं भवेत्तस्य कवचस्य च धारणात् |
भूतप्रेतपिशाचाश्च यक्षगंधर्वराक्षसाः || 13 ||

ब्रह्मराक्षसवेताला न द्रष्टुमपि तं क्षमाः |
दूरादेव पलायंते तस्य संकीर्तनादपि || 14 ||

भूर्जपत्रे समालिख्य रोचनागुरुकुंकुमैः |
रविवारे च संक्रांत्यां सप्तम्यां च विशेषतः |
धारयेत् साधकश्रेष्ठः स परो मे प्रियो भवेत् || 15 || [श्रीसूर्यस्य]

त्रिलोहमध्यगं कृत्वा धारयेद्दक्षिणे करे |
शिखायामथवा कंठे सोऽपि सूर्यो न संशयः || 16 ||

इति ते कथितं सांब त्रैलोक्यमंगळाभिधं |
कवचं दुर्लभं लोके तव स्नेहात् प्रकाशितं || 17 ||

अज्ञात्वा कवचं दिव्यं यो जपेत् सूर्यमुत्तमं |
सिद्धिर्न जायते तस्य कल्पकोटिशतैरपि || 18 ||

इति श्रीब्रह्मयामले त्रैलोक्यमंगळं नाम श्री सूर्य कवचं ||